(Shlokaas 60.5 to 80; Devanagari script followed by Roman script)

ॐ श्रीसीतारामचन्द्राभ्यां नमः ।

---------------------------- ।

सुग्रीवश्चापि तत्सर्वं श्रुत्वा रामस्य वानरः ॥ १-१-६० ॥

चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम् ।

ततो वानरराजेन वैरानुकथनं प्रति ॥ १-१-६१ ॥

रामायावेदितं सर्वं प्रणयाद् दुःखितेन च ।

प्रतिज्ञातं च रामेण तदा वालिवधं प्रति ॥ १-१-६२ ॥

वालिनश्च बलं तत्र कथयामास वानरः ।

सुग्रीवः शङ्कितश्चासीत् नित्यं वीर्येण राघवे ॥ १-१-६३ ॥

राघवप्रत्ययार्थं तु दुन्दुभेः कायमुत्तमम् ।

दर्शयामास सुग्रीवो महापर्वतसन्निभम् ॥ १-१-६४ ॥

उत्स्मयित्वा महाबाहुः प्रेक्ष्य चास्थि महाबलः ।

पादाङ्गुष्ठेन चिक्षेप सम्पूर्णं दशयोजनम् ॥ १-१-६५ ॥

बिभेद च पुनः सालान् सप्तैकेन महेषुणा ।

गिरिं रसातलं चैव जनयन् प्रत्ययं तदा ॥ १-१-६६ ॥

ततः प्रीतमनास्तेन विश्वस्तः सः महाकपिः ।

किष्किन्धां रामसहितो जगाम च गुहां तदा ॥ १-१-६७ ॥

ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिङ्गलः ।

तेन नादेन महता निर्जगाम हरीश्वरः ॥ १-१-६८ ॥

अनुमान्य तदा तारां सुग्रीवेण समागतः ।
निजघान च तत्रैनं शरेणैकेन राघवः ॥ १-१-६९ ॥

ततः सुग्रीववचनात् हत्वा वालिनमाहवे ।
सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत् ॥ १-१-७० ॥

स च सर्वान् समानीय वानरान् वानरर्षभः ।
दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम् ॥ १-१-७१ ॥

ततो गृध्रस्य वचनात् सम्पातेर्हनुमान् बली ।
शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवम् ॥ १-१-७२ ॥

तत्र लङ्कां समासाद्य पुरीं रावणपालिताम् ।
ददर्श सीतां ध्यायन्तीम् अशोकवनिकां गताम् ॥ १-१-७३ ॥

निवेदयित्वाऽभिज्ञानं प्रवृत्तिं विनिवेद्य च ।
समाश्वास्य च वैदेहीं मर्दयामास तोरणम् ॥ १-१-७४ ॥

पञ्च सेनाग्रगान् हत्वा सप्त मन्त्रिसुतानपि ।
शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत् ॥ १-१-७५ ॥

अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात् ।
मर्षयन् राक्षसान् वीरो यन्त्रिणस्तान् यदृच्छया ॥ १-१-७६ ॥

ततो दग्ध्वा पुरीं लङ्काम् ऋते सीतां च मैथिलीम् ।
रामाय प्रियमाख्यातुं पुनरायात् महाकपिः ॥ १-१-७७ ॥

सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम् ।
न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः ॥ १-१-७८ ॥

**Samskrita Bharati, 1044 Lancer Drive, San Jose, CA 95129, USA**
SamskritaBharati@yahoo.com www.samskrita-bharati.org
Tel: 978-268-8406; Fax: 831-301-6972; EIN: 77-0545072;

ततः सुग्रीवसहितो गत्वा तीरं महोदधेः।
समुद्रं क्षोभयामास शरैरादित्यसन्निभैः॥ १-१-७९ ॥

दर्शयामास चात्मानं समुद्रः सरितां पतिः।
समुद्रवचनाच्चैव नलं सेतुमकारयत्॥ १-१-८० ॥

इति वाल्मीकीये आदिकाव्ये बालकाण्डे प्रथमसर्गे चतुर्थो भागः।

**अवधेयम्** – एते श्लोकाः राष्ट्रीयसंस्कृतसंस्थानेन २००७-तमे वर्षे प्रकाशितस्य संक्षेपरामायणम्-नामकस्य पुस्तकस्य द्वितीयसंस्करणानुसारं सन्ति। बालेभ्यः सुलभं भवेदिति मत्वा कुत्रचित् स्थानेषु (यत्र पदानि नीलवर्णेन सूचितानि सन्ति तत्र) सन्धिविभजनं कृतमस्ति। MP3-Audio मध्ये रक्तवर्णेन सूचितस्य पदस्य ध्वनिमुद्रणं प्रीतश्चाग्निसाक्षिकम् इति अस्ति। साधुरूपमस्ति प्रीतश्चैवाग्निसाक्षिकम्।

om śrīsītārāmacandrābhyāṁ namaḥ|

-----------------------------------------------------------------|
sugrīvaścāpi tatsarvaṁ śrutvā rāmasya vānaraḥ || 1-1-60 ||

cakāra sakhyaṁ rāmeṇa prītaścaivāgnisākṣikam |
tato vānararājena vairānukathanaṁ prati || 1-1-61||

rāmāyāveditaṁ sarvaṁ praṇayād duḥkhitena ca|
pratijñātaṁ ca rāmeṇa tadā vālivadhaṁ prati || 1-1-62||

vālinaśca balaṁ tatra kathayāmāsa vānaraḥ |
sugrīvaḥ śaṅkitaścāsīt nityaṁ vīryeṇa rāghave || 1-1-63||

rāghavapratyayārthaṁ tu dundubheḥ kāyamuttamam |
darśayāmāsa sugrīvo mahāparvatasannibham || 1-1-64||

utsmayitvā mahābāhuḥ prekṣya cāsthimahābalaḥ |
pādāṅguṣṭhena cikṣepa sampūrṇaṁ daśayojanam || 1-1-65||

bibheda ca punaḥ sālān saptaikena maheṣuṇā |
giriṁ rasātalaṁ caiva janayan pratyayaṁ tadā || 1-1-66||

tataḥ prītamanāstena viśvastaḥ saḥ mahākapiḥ |
kiṣkindhāṁ rāmasahito jagāma ca guhāṁ tadā || 1-1-67||

tato'garjaddharivaraḥ sugrīvo hemapiṅgalaḥ |
tena nādena mahatā nirjagāma harīśvaraḥ || 1-1-68||

anumānya tadā tārāṁ sugrīveṇa samāgataḥ |
nijaghāna ca tatrainaṁ śareṇaikena rāghavaḥ || 1-1-69||

tataḥ sugrīvavacanāt hatvā vālinamāhave |
sugrīvameva tadrājye rāghavaḥ pratyapādayat || 1-1-70||

sa ca sarvān samānīya vānarān vānararṣabhaḥ |
diśaḥ prasthāpayāmāsa didṛkṣurjanakātmajām || 1-1-71||

tato gṛdhrasya vacanāt sampāterhanumān balī |
śatayojanavistīrṇaṁ pupluve lavaṇārṇavam || 1-1-72||

tatra laṅkāṁ samāsādya purīṁ rāvaṇapālitām |
dadarśa sītāṁ dhyāyantīm aśokavanikāṁ gatām || 1-1-73||

nivedayitvā'bhijñānaṁ pravṛttiṁ vinivedya ca |
samāśvāsya ca vaidehīṁ mardayāmāsa toraṇam || 1-1-74||

pañca senāgragān hatvā sapta mantrisutānapi |
śūramakṣaṁ ca niṣpiṣya grahaṇaṁ samupāgamat || 1-1-75||

astreṇonmuktamātmānaṁ jñātvā paitāmahādvarāt |
marṣayan rākṣasān vīro yantriṇastān yadṛcchayā || 1-1-76||

tato dagdhvā purīṁ laṅkām ṛte sītāṁ ca maithilīm |
rāmāya priyamākhyātuṁ punarāyāt mahākapiḥ || 1-1-77||

so'bhigamya mahātmānaṁ kṛtvā rāmaṁ pradakṣiṇam |
nyavedayadameyātmā dṛṣṭā sīteti tattvataḥ || 1-1-78||

tataḥ sugrīvasahito gatvā tīraṁ mahodadheḥ |
samudraṁ kṣobhayāmāsa śarairādityasannibhaiḥ || 1-1-79||

darśayāmāsa cātmānaṁ samudraḥ saritāṁ patiḥ |
samudravacanāccaiva nalaṁ setumakārayat || 1-1-80||

iti vālmīkiye ādikāvye bālakāṇḍe prathamasarge caturtho bhāgaḥ|

**Please note** - Text given above is as per 2nd edition (2007) of saṅkṣeparāmāyaṇam published by rāṣṭrīyasaṁskṛtasaṁsthānam. Words highlighted in blue color are given without sandhi (the articulatory process of joining adjascent words) to make it easier for children to chant. The word shown in red color has been recorded in the MP3 Audio file as prītaścāgnisākṣikam. The correct form is prītaścaivāgnisākṣikam.

**Samskrita Bharati, 1044 Lancer Drive, San Jose, CA 95129, USA**
SamskritaBharati@yahoo.com www.samskrita-bharati.org
Tel: 978-268-8406; Fax: 831-301-6972; EIN: 77-0545072;